# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| कक्षा - तत्त्वाचार्य ( सत्र-१ ) | प्रश्नपत्रम् – २ | गुणाः - ७० |
|---|---|---|
| विषयः - दर्शनम् | | |
| दिनाङ्कः - ०५/१२/२०१८ | | समयः - १०:०० तः ०१:०० |

**प्रथमान्वितिः**

**प्रश्नः १ कस्यचिद् एकस्य प्रश्नस्य व्याख्यात्मकम् उत्तरं लिखत ।** **( ०५ )**

*(१) भारतीयदर्शनविषयकस्य कस्यचित् एकस्य शोधग्रन्थस्य परिचयं लिखत ।*

*(२) सर्वदर्शनसङ्ग्रहस्य परिचयं लिखत ।*

**प्रश्नः २ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) वेदान्तदर्शने संशोधनपद्धतिविषये एकं निबन्धं लिखत ।*

*(२) न्यायदर्शने संशोधनविधिविषयकं निबन्धम् एकं रचयत ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ कस्यचिदेकस्य प्रश्नस्य व्याख्यात्मकम् उत्तरं लिखत ।** **( ०५ )**

*(१) सांख्यमतानुसारं व्यक्ताव्यक्तज्ञतत्त्वानां विवेचनं कुरुत ।*

*(२) वेदान्तदर्शरीत्या आत्मसाक्षात्कारस्य उपायान् चर्चयत ।*

**प्रश्नः ४ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) न्यायदर्शनानुसारं षोडशपदार्थानां निःश्रेयसाधिगमत्वं प्रतिपादयत ।*

*(२) योगदर्शनानुसार द्विविधसमाधेः वर्णनं कुरुत ।*

**तृतीयान्वितिः**

**प्रश्नः ५ कस्यचिदेकस्य व्याख्यात्मकम् उत्तरं लिखत ।** **( ०५ )**

*(१) वेदान्तदर्शनानुसारम् अनुबन्धचतुष्टयं लिखत ।*

*(२) वैषेशिकदर्शनानुसारं सप्तपदार्थान् विवेचयत ।*

**प्रश्नः ६ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) अष्टाङ्गयोगं निरूपयत ।*

*(२) भगवद्गीतानुसारम् आत्मतत्त्वं विवेचयत ।*

**चतुर्थान्वितिः**

**प्रश्नः ७ कस्यचिदेकस्य व्याख्यात्मकम् उत्तरं लिखत ।** **( ०५ )**

*(१) त्रिविधां शास्त्रप्रवृत्तिं लिखत ।*

*(२) प्रमाणलक्षणं विवेचयत ।*

**प्रश्नः ८ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) न्यायदर्शनानुसारम् अनुमानप्रमाणं विवेचयत ।*

*(२) पञ्चहेत्वाभासान् प्रतिपादयत ।*

**प्रश्नः ९ केषाञ्चन दशप्रश्नानाम् अतिलघूत्तराणि लिखत ।** **( १० )**

*(१) सांख्यमते प्रकृतिविकृतयः कति सन्ति ?*

*(२) वेदान्तमते साधनचतुष्टयं किम् ?*

*(३) वेदान्तपरिभाषा केन लिखिता ?*

*(४) गुणाः कति सन्ति न्यायमते ?*

*(५) वेदान्तदर्शने कति प्रमाणानि स्वीक्रियन्ते ?*

*(६) तर्कसंग्रहः केन लिखितः ?*

*(७) सर्वदर्शनसंग्रहः केन लिखितः ?*

*(८) न्यायनये कतिविधं प्रमाणं स्वीक्रियते ?*

*(९) ब्रह्मसूत्रेषु कति अध्यायाः सन्ति ?*

*(१०) शारीरकभाष्यं केन लिखितम् ?*

*(११) पञ्चदशीकारः कः ?*

*(१२) भामतीकारः कः ?*

*(१३) न्यायमते सन्निकर्षः कतिविधः ?*

*(१४) पूर्वमीमांसायाः मतद्वयं किमस्ति ?*

*(१५) किं नाम दर्शनम् ?*

--००--